(7) Forgivness wins the world over to its side every time. Is there anything it can not achieve? What can the wicked do to one who wields the sword of piece ?

८) एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ।।

(8) Only dharma can achieve the utmost good. Only forgivness can bring lasting peace. Only knowledge can give the highest satisfaction. Only nonviolence can confer the greatest happiness.

WITH BEST COMPLIMENTS FROM

Sai Construction Pvt. Ltd.
1117/A-1,'Ashish' Lakaki Road,
Pune - 411 016. *Phone : 51079, 52055*

Sai Associates
(S.Park Project)
1117 A/1 Shish Lakaki Road
Pune 411 016. *Phone 51079.*

With Best Compliments From

Ventri Chemicals Pvt. Ltd.
Manufactureres of
Poultry Feed & Animal Health Products

Venkateshwara House
Survey No. 114/A/2, Pune - Sinhagad Road,
Phone 422530, 422231, 422259.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शृङ्गेरी-शारदा-पीठम्

नेदम् अविदितं सर्वेषां सत्य-प्रियाणाम् आस्तिक-वरेण्यानां यत् श्रीमच्छंकरभगवत्पादाचार्याः सनातनं वैदिकं धर्मम् औपनिषदम् अद्वैत-सिद्धान्तं च लोकान् अवबोध्य तयोः सार्वदिक-प्रचाराय भारतस्य चतसृषु दिक्षु चत्वारि पीठानि स्थापितवन्तः इति । तेषु दक्षिणस्यां दिशि तुङ्गा-तटिनी-तटे शृङ्गगिरि-क्षेत्रे प्रतिष्ठापितं शारदा-पीठं जगद्-विदितं वरीवर्ति । स च शृङ्गगिरिः विद्यारण्य-श्रीचरणैः श्रीमच्छंकर-दिग्विजये इत्थं वर्णितः –

" यत्राधुनाप्युत्तममृष्यशृङ्गः तपश्चरत्यात्म-भृदन्तरङ्गः ।
संस्पर्शमात्रेण वितीर्णभद्रा विद्योतते यत्र च तुङ्गभद्रा ।।

अभ्यागतार्चाल्पित-कल्पशाखाः, कूलङ्कषाधीत-समस्त-शाखाः ।
इज्याशतैर्यत्र समुल्लसन्तः शान्तान्तरायाः निवसन्ति सन्तः ।।

प्रकल्प्य तत्रेन्द्र-विमान-कल्पं प्रासादमाविष्कृत-सर्व-शिल्पम् ।
प्रवर्तयामास स देवतायाः पूजामजाद्यैरपि पूजितायाः ।।

या शारदाम्बेत्यभिधां वहन्ती कृतां प्रतिज्ञां परिपालयन्ती ।
अद्यापि शृङ्गेरि-पुरे वसन्ती विद्योतते ऽभीष्ट-वरान् दिशन्ती ।।"

ईदृङ्-महिम-शालिनि शृङ्गगिरौ भगवत्पादाः शारदापीठं प्रत्यतिष्ठिपन् । तत्र च पीठ-स्थापन-निदान-भूतां काञ्चिद् आख्यायिकां तत्रत्याः वृद्धाः अद्यापि इत्थमाचक्षते –

भगवत्पादाः शिष्य-परिवृताः यात्रा-क्रमेण यदा शृङ्गगिरिम् आसादयन् तदा ते अत्यधिके आतपे प्रसव-वेदनाम् अनुभवन्तीं काञ्चिद् भेकीं तत्सहज-वैरिणा फणिना फणा-प्रसारणेन आतपात् संरक्ष्यमाणाम् अद्राक्षुः । निसर्ग-वैरिणो ऽपि जन्तवः अत्र परं नैसर्गिकं विरोधं विस्मृत्य सस्नेहं व्यवहरन्तीति अहो अस्य प्रदेशस्य सर्वातिशायि वैशिष्ट्यम् इति विस्मितान्तरङ्गाः पीठ-स्थापनाय अयमेव युक्तः प्रदेश इति निर्णीय तस्मिन् क्षेत्रे शारदापीठं प्रत्यतिष्ठिपन् इति ।

भगवत्पादैः शृङ्गगिरि-शारदापीठे अभिषिक्ताः **श्रीसुरेश्वराचार्याः** । ते खलु पूर्वाश्रमे विश्वरूप इति प्रथिताभिधानाः मण्डनमिश्र इत्यपि लोके विश्रुताः विद्वत्-शिरोमणयः, यदीय-गृह-द्वारस्थ- नीडान्तर-सन्निरुद्धाः कीराङ्गना अपि " **वेदाः स्वतःप्रमाणं परतःप्रमाणम्** " इति , " **जगद्-ध्रुवं स्यात् जगद् अध्रुवं स्यात्** " इति " **फल - प्रदं कर्म फल-प्रदोजः** " इत्यादीनि वचनानि सङ्गिरन्त्यः आसन् । कर्माध्व-संरक्षकाणां मीमांसायाः आधार-स्तम्भायितानां कुमारिलभट्टपादानाम् अन्तेवासिन इति सुप्रथितास्ते । भगवत्पादैः जल्प-कथायां पराजिग्यिरे । औपनिषदम् अद्वैतात्मतत्त्वम् अवबोध्य भगवत्पादाः तेभ्यः पारमहंस्यम् अनुगृह्य **सुरेश्वर** इति नाम्ना तान् व्यद्योतयन् । पूर्वाश्रमे कर्म-मार्गे बद्ध-श्रद्धाः अपि ते भगवत्पादोपदेश-महिम्ना अद्वैतमेव परमं मेनिरे । अद्वैत-प्रबोधकान् नैष्कर्म्य-सिद्ध्यादीन् ग्रन्थान् विरचय्य भगवत्पादानां परमानुकम्पां प्रपेदिरे ।

शृङ्गेरी-शारदा-पीठस्य खल्विदं वैशिष्ट्यं यत् तदधिपतयः सर्वेऽपि सुरेश्वराचार्यान् आरभ्य अद्य यावत् महान्तो विद्वांसः, " **आचिनोति च शास्त्रार्थम्**" इत्याद्याचार्य-लक्षण-लक्षिता इति च । सुरेश्वराचार्योत्तरं **विद्यातीर्थ** -पर्यन्ता आचार्याः शास्त्र-प्रचार-मात्र-निरताः आसन् । तेषु ज्ञानोत्तमाचार्याणां शिष्येषु **चित्सुखाचार्याः** विद्वत्-समाजे अत्यर्थं प्रसिद्धाः । '**चित्सुखी'** इत्यपरनाम्नी तद्विरचिता तत्त्व-प्रदीपिका अद्वैत-ग्रन्थेषु विशिष्टं स्थानं समासादयतीति न तिरोहितं विदुषाम् । तादृशाः बहवः विद्वांसः तादात्विकानां शृङ्गगिरि-शारदा-पीठाधीश्वराणां गुरुवर्याणां सकाशात् लब्ध-विद्या इति श्रूयते ।

शृङ्गेरी-शारदापीठे दशमाचार्यत्वेन प्रथिताः **विद्यातीर्थ-** श्रीचरणाः अप्रतिम-प्रतिभा-विभ्राजिताः आसन् इति तदीय-चरिताद् अवगम्यते । तान् अधिकृत्य तदानीन्तनाः राजानो ऽपि इत्थं तुष्टुवुरिति जन-श्रुतिः वरीवर्ति । यथा –

" विद्यातीर्थ-यतीन्द्रो ऽयम् अतिशेते दिवाकरम् ।
तमो हरति यत् पुंसाम् अन्तर्बहिरहर्निशम् ।। " इति ।

अस्यायमभिप्रायः – भगवान् सहस्र-रश्मिः तमोपहः इति लोके प्रसिद्धः परन्तु सः बाहिरम् एव तमः अपनुदति न आन्तरं, तदपि दिवैव, न तु निशि । अयं तु **विद्यातीर्थ-** नामा देशिक-सार्वभौमः आन्तरम् अपि तमः सर्वदाप्यपहन्ति । आन्तरं हि तमः अज्ञानमेव । तच्च गुरुणैव ज्ञानोपदेश-द्वारा अपाकर्तव्यं नान्येन केनचित् । अतः सर्वविधस्यापि तमसः सर्वदा निवर्तकत्वात् सर्वोत्तमः सद्गुरुरेव भवितुम् अर्हति इतीदं तत्त्वम् अस्मिन् पद्ये निगूढमस्ति । तत्तादृश-महिम-शालिनां विद्यातीर्थाचार्याणाम् एव शिष्यतां गतौ **भारतीतीर्थ-विद्यारण्य** -नामानौ यति-श्रेष्ठौ यौ विद्यातीर्थोत्तरं शृङ्गगिरि-शारदापीठाधिपत्यं क्रमान्निरवहताम् । लम्बिकायोग-निरतत्वेन प्रथिताः विद्यातीर्थाः, अन्यैः अशक्यानुष्ठानं लम्बिकायोगम् अनुष्ठाय महान्तो योगीश्वराः इत्यपि पप्रथिरे । तत्-स्मारकत्वेन शृङ्गगिरौ निर्मापितो **श्रीविद्या - शंकरालयः** भारतदेशे वर्तमानेषु अत्यद्भुत-शिल्पसम्पदा विराजमानेषु कतिपयेषु देवालयेषु अन्यतमः सन् द्रष्टृणां चेतस्सु विस्मयम् आनन्दं च सकृदेव जनयन् सर्वातिशायी अद्यापि विद्योतते । तेषामेव विद्यातीर्थाचार्याणां कटाक्ष-प्रसारेण संजाताः सर्वातिशायि- सामर्थ्य-सम्पन्नाः **विद्यारण्यस्वामिनः** कर्नाटक-सिंहासन-प्रतिष्ठापनाचार्य-पदवीं प्रपेदिरे । तदा खलु वैदिके धर्मे लुप्तप्राये च सति विद्यारण्याभिधस्य सहस्ररश्मेः उदयो यदि नाभविष्यत् तर्हि यवन-संस्कृति-तमिस्रा नापागमिष्यत् । सनातन-धर्म-कमलं न विकासम् ऐष्यत् । अत एव शंकरभगवत्पादानाम् अवतारभूताः विद्यारण्यस्वामिनः सनातन-धर्मोद्धरणायैव अस्यां भुवि व्यद्योतन्तेति महद्भिरद्यापि संस्तूयन्ते । विद्यारण्यस्वामिनां पाण्डिती-प्रकर्षस्तु परां काष्ठाम् उपगतः । चतुर्णामपि वेदानां भाष्याणि विद्यारण्य-प्रणीतत्वेन प्रसिद्धानि वेदार्थस्य अवबोधने प्रदीपायितानीति कस्य वा नाविदितम् । मीमांसायां

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वेदान्ते धर्म-शास्त्रे व्याकरणे ज्योतिषे किंबहुना सर्वेष्वपि दर्शनेषु विद्यारण्याः स्वीयां लेखनीं व्यापारयामासुः । त एव **हम्पी**-क्षेत्रे कञ्चन मठं निर्माय **विरूपाक्ष-मठ** इति तं प्राख्यापयन्, यः शृङ्गगिरि-शाखा-मठत्वेन लोके प्रसिद्धिमवाप ।

विद्यारण्योत्तरं शृङ्गगिरि-शारदापीठम् अधिष्ठितवत्सु आचार्येषु **अभिनवनृसिंहभारती-** नामानः आचार्य-तल्लजाः विशिष्टम् उल्लेखम् अर्हन्ति । ते खलु पद्मपुराणान्तर्गतस्य अध्यात्म-तत्त्व-प्रतिपादकस्य मन्त्र-शास्त्र-गर्भितस्य **शिवगीता**ख्यस्य ग्रन्थराजस्य गम्भीरं भाष्यं विरचय्य लोकानां महतीम् उपकृतिमातन्वन् । कर्नाटकेषु **शिवगङ्गा**-नाम्नि क्षेत्रे कञ्चन शाखा-मठं परिकल्प्य विद्यारण्यवद् धर्म-प्रचाराय पर्यश्राम्यन् । स एव च **शिवगङ्गा-मठ** इति प्रसिद्धः अद्यापि शृङ्गगिरि-शाखा-मठत्वेन प्रसिद्धो वर्तते । शृङ्गगिरि-क्षेत्रे गिरेरुपरि विराजमाने शिवमन्दिरे भगवान् महादेवः **मलहानिकरेश्वर**-नाम्ना विद्योतते । तस्मिन् आलये गणपतेर्मूर्तिः पूर्वं पार्थक्येन नासीत् । अभिनवनृसिंहभारतीस्वामिनः तमालयं भगवन्तं पूजयितुमेत्य गणपति-मूर्तेः अभावम् आकलय्य एकस्मिन् स्तम्भे हरिद्रा-खण्डेन गणपतेः मूर्तिम् आलिख्य अपूजयन् । कालक्रमेण तस्मिन् स्तम्भे गणपतेः मूर्तिः प्रादुरभूत् । अत एव ते महानुभावाः **स्तम्भे हेरम्बदर्शनः** इति अनितरसाधारणीं प्रसिद्धिमवाप्नवन् । तेषाम् अन्तेवासिनः **श्रीसच्चिदानन्दभारतीस्वामिनो**ऽपि वेद-शास्त्र-विद्वांसः तपस्विनश्चासन् ।तेषां **गुरु-स्तुति-शतक**-नामा ग्रन्थः सदाशिव-प्रभृति- स्वाचार्यपर्यन्तानां गुरूणां स्तुतिपरो विलसति । परम्परायां त्रिंशत्तमाः आचार्याः अपि **श्रीसच्चिदानन्दभारती** इत्येव प्रसिद्धाः यदीयं चरितं लोकानां विस्मयावहम् आस्ते । तदानीं महीशूर-राज्ये राजप्रतिनिधित्वेन पूर्णय्य – नामा महान् मेधावी अति-दक्षश्चाधिकारी आसीत् । स च सच्चिदानन्दभारतीस्वामिनां पाण्डिती-विषये संशयितमना आसीत् । तदा महीशूर-संस्थाने स्थितवद्भिः शास्त्रार्थ-निष्णातैर्विद्वद्भिः शास्त्रार्थो विधेयेति पूर्णय्य-महाशयेन प्रार्थितास्ते आचार्यवर्याः यवनिकान्तरितैः विद्वद्भिः शास्त्रार्थं विधास्याम इति अवोचन् । तथैव व्यवस्थायां विहितायाम् आचार्य-चरणानां मुखात् गङ्गाझरीव शास्त्रार्थ-धारा प्रवहन्ती आसीत्, । परन्तु कस्याश्चित् सीमन्तिन्याः कण्ठ-ध्वनिरिव तदा आचार्याणां ध्वनिः प्रत्यभात्, । तदाकर्ण्य किमेतदिति विस्मयाविष्ट-चेताः पूर्णय्य-महाशयः यदा यवनिकां किंचिद् उद्धृत्यापश्यत् तदा **आचार्याणां स्थाने साक्षात् शारदामेव उपविष्टाम्** अपश्यत् । अनुपदमेव सः विच्छिन्न-सकल-संशयः आचार्यचरणान् शारदायाः पुंभाव-रूपान् निश्चित्य तान् अतितरां सममानयत् । तेषां विषये तस्य स्थिता असाधारणी भक्तिः शृङ्गगिरि-मठे अद्यापि संरक्षितेभ्यः पूर्णय्य-विलिखित-पत्रेभ्यः स्पष्टं विज्ञायते ।

परम्परायां द्वात्रिंशत्वेन **श्रीनृसिंहभारती**-नामानः आचार्य-श्रेष्ठाः प्राकाशन्त । ते खलु बाल्ये एव वीताखिल-विषयेच्छाः अधीत-शास्त्राः स्वीकृत-पारमहंस्याः शृङ्गगिरि-व्याख्यान-सिंहासनं पर्यभूषयन् । शृङ्गगिरि-निकटवर्तिनि **नृसिंहपर्वत**-नाम्नि शिलोच्चये बहूनि वर्षाणि कठोरं तपस्तप्त्वा भगवतः श्रीनृसिंहस्य इतर – दुष्प्रापाम् अनुकम्पाम् अवाप्नवन् । अत एव तेषां मुखात् यथा वाङ् निस्सरति तथैव भवति स्मेति संगिरन्ते वृद्धाः । " ऋषीणां पुनराद्यानां वाचमर्थोनुधावति । " इति भवभूत्युक्ते‌ते महानुभावाः उदाहरणतां भजन्ति स्म । भारते सर्वस्मिन् ते धर्मयात्रां व्यधासिषुरिति तदीय अष्टोत्तर-शत-नाम-घटकेन **द्वारकादि-महाक्षेत्र-यात्रा-सन्तुष्ट-मानसः** इति नाम्ना स्पष्टमवगम्यते । बहवः राजानः विशिष्टाः अधिकारिणः महान्तो विद्वांसः किंबहुना तत्संसर्गभाजः सर्वेऽपि आत्मानं कृतार्थमन्वन्त । दक्षिण-भारते तेषां कीर्तिः तदानीं परां कोटिमाटीकत । मठे निर्वहणादि-विषयेषु नैकाः विशिष्टाः व्यवस्थाः तैः व्यधायिषत । द्व्यशीति वर्षाणि भुवम् इमाम् अलंकृत्य सच्छिष्ये मठाधिपत्य-भारं समारोप्य शृङ्गगिरावेव परस्मिन् ब्रह्मणि ते महानुभावाः लिल्यिरे ।

तेषामेव अन्तेवासिनः जगद्विख्याताः **श्रीसच्चिदानन्द-शिवाभिनव-नृसिंहभारतीस्वामिनः** । महीशूर-नगर्यां पण्डित-सार्वभौमत्वेन प्रथितानां शतकोट्यादि-अतिकर्कश-तर्क-ग्रन्थ-विरचनावाप्त – यशसां श्रीमतां रामशास्त्रिणां तृतीय-सुतत्वेन लब्ध-जन्मानस्ते बाल्य एव **श्रीनृसिंहभारतीस्वामिनाम्** अपार-करुणा-पात्रतामवाप्य स्वीये नवमे वयसि तेभ्यः एव तुरीयमाश्रममवाप्य तस्मिन् एव दिने क्षणदायां सर्वोऽहमिति उत्स्वप्नायन्ते स्म । तेषां योग्यतां समीक्ष्य गुरवोपि विस्मितान्तरङ्गाः बभूवुरिति तदीयं चरितमावेदयति । दक्षिण-भारते सर्वत्र धर्म-प्रचार-यात्रां नैकवारं विधाय लोकानां चेतस्सु ते धर्मश्रद्धाम् उदपादयन् । **शङ्करभगवत्पादानाम् अवतार-भूमिम् अन्विष्य माधवीय- शङ्कर-विजयस्थ-चिह्नैः, स्वप्ने साक्षात् कृतवत्याः भगवत्पाद-जनन्याः श्रीमत्याः आर्याम्बायाः दिव्य-वचोभिश्च कालटी इत्येव निश्चित्य तत्र भगवत्पादानां शारदाम्बायाश्च मन्दिरे निर्माय अशीति-वर्षेभ्यः प्रागेव** तत्र **कुम्भाभिषेकं निरवर्तयन्** । लोकस्य महतीमुपकृतिम् आततवतां श्रीमद्भगवत्पादानां जयन्ती वैशाख-शुक्ल-पञ्चम्यां सर्वैरपि आस्तिकैः महत्या भक्त्या समाचरणीयेति अन्वशिषन् । भगवत्पादीयान् समानपि ग्रन्थान् **शाङ्कर-ग्रन्थावलि**-नाम्ना प्रकाश्य लोकानतितराम् अन्वगृह्णन् । शृङ्गगिर्यां **सद्विद्यासंजीवनी**-नाम्नीं वेदशास्त्र-पाठशालां प्रत्यतिष्ठिपन् । यस्यां परस्सहस्रं विद्यार्थिनः वेद-शास्त्रेषु विनीता बभुवुः भवन्ति च । ततोऽपि प्रौढशालां बेङ्गलूर-नगर्यां **भारतीय-गीर्वाण-प्रौढ-विद्याभिवर्धिनी-पाठशाला**-नाम्नीं प्रतिष्ठाप्य मीमांसा-वेदान्त-शास्त्राध्ययनाय विशिष्टां व्यवस्थाम् आतन्वन् । इत्थं लोकोपकारकाणि नैकानि कार्याणि विधाय ते महात्मानः भगवत्पादानामेव अवतारभूता इति प्रसिद्धिं प्रपेदिरे ।

तेषाम् अन्तेवासिनः **श्रीचन्द्रशेखरभारतीमहास्वामिनः** जीवन्मुक्ताः कृत-तपश्चर्याः साक्षात्कृत- परब्रह्माणश्च विरेजिरे । असाधारणी गुरु-भक्तिः अकुण्ठित-शास्त्र-प्रज्ञा, अकम्पा शिष्येष्वनुकम्पा तान् सर्वान् प्राख्यापयन् । **कालट्यां वेद-वेदान्त-पाठशाला**-प्रतिष्ठापनं महीशूर-नगर्यां

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्वगुरुचरणानाम् अधिष्ठानस्य जन्मभूमौ **अभिनव-शङ्करालय** -निर्माणं शृङ्गगिरौ **शारदालयस्य** स्वगुरुचरणानाम् अधिष्ठानस्य च कुम्भाभिषेक इत्यादीनि विशिष्टानि कार्याणि तेषां कीर्तेः पताकायितानि विलसन्ति । श्रीमच्छंकरभगवत्पाद-विरचितस्य करतलामलकवत् आत्मतत्त्व-प्रतिपादन-पटीयसोऽपि गभीरार्थस्य **विवेकचूडामणेः प्रामाणिकं सुलभावबोधं सर्वेषामपि हृदयंगमं व्याख्यानं** तैरेव महानुभावैः विरचितं विद्योतते । नैकान् अन्तेवासिनः न्याय-वेदान्तादि-शास्त्राणि स्वयमेव अध्याप्य तान् विपश्चिदपश्चिमान् अतानिषुः । सत्यपि मठीये गुरुतरे भारे सर्वदा निर्लिप्तास्सन्तः भूयांसम् अनेहसम् आत्मज्ञान एव अतिवाहयामासुः । अत एव ते

सदात्म-ध्यान-निरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ।।

– इति शिष्टैः संस्तूयन्ते । तेषाम् अन्तेवासिनः अधुना शृङ्गगिरि-शारदापीठं परिभूषयन्तः **जगद्गुरुश्रीमदभिनवविद्यातीर्थ-'श्री'-चरणाः** तदन्तेवासिनः अधुना पुण्यपत्तने चातुर्मास्यानुष्ठान-परायणाः **जगद्गुरुश्रीभारतीतीर्थ श्री** 'चरणाश्च सर्वेषामपि आस्तिकानां वन्दनीय-चरणाः विद्योतन्ते । एते खलु अस्मद्-गुरु-चरणाः सर्वत्र भारते संचारं विधाय लोकान् धर्मम् उपदिशन्तः सनातन-धर्म-प्रचारकान् समुत्साहयन्तः सुरसरस्वती-प्रचारणे बद्धादराः शृङ्गेरी-पीठ-भूषायिताः विलसन्ति । एतेषां शास्त्र-पाण्डित्यं सदाचार-निष्ठा च सर्वैरपि सुविदितैव । अत एव युक्तमुक्तं केनचित् कविना –

सशरीरः शास्त्र-गणस् तनुमांस्तुरीयाश्रमोचितो धर्मः ।
विग्रहवद् वैराग्यं शृङ्गगिरौ भाति शारदापीठे ।। इति ।



भगवत्-पादानां जन्मकालः

" आचार्य-शंकर-भगवत्-पादाः सनातन-धर्मोद्धाराय कृतावतारा इति निश्चप्रचम् । तेषां काल-विषये बहवो बहुधा अभिप्रायान् प्रकटयन्ति । परन्तु शंकर-भगवत्-पादैः स्व-ग्रन्थेषु कृताः ग्रन्थान्तरकाराणाम् उल्लेखाः ग्रन्थान्तरकारैः कृताः शंकराचार्याणाम् उल्लेखाश्च निष्पक्षपात-दृष्ट्या परिशील्यमानाः भगवत्-पूज्यपाद-शंकराचार्याणां जन्म ख्रिस्ताब्दीय – अष्टमे शतके इति सदृढं प्रत्याययन्ति । भगवत्-पादानां सहस्र-द्वय-वर्ष-प्राक्-कालिकत्व-कल्पना तु अज्ञान-मूलिकैवेति अस्माकं निश्चयः । प्राच्य-पाश्चात्त्य-विद्वद्भिः महता परिश्रमेण अनेक-प्रमाण-प्रदर्शन-पुरस्सरं भगवत्-पादानां ७८८-८२० इति निर्णीतो यः कालः स एवास्माभिः स्वीक्रियते, नान्यः, इति वयं स्पष्टीकुर्मः । अत एवाधुना भगवत्-पादानां द्वादश–शत-जयन्त्युत्सवस्य प्रवर्तनम् अत्यन्तम् औचित्यपूर्णम् आसीद् इत्यपि महान् अस्माकं प्रमोदः ।"

पुण्यपत्तने शुक्ल-व्यासपूर्णिमा — **- प.पू. श्री चरणाः**

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प. पू. जगद्‌गुरु श्री शृंगेरी शंकराचार्य चातुर्मास्य - सेवा-समिती, पुणे.

यांच्या कार्यास आमच्या हार्दिक शुभेच्छा

GL SERIES



क्राऊन - टीव्ही

- मे. रांका असोसिएटस, पुणे २ फोन २१०९९ PP
- मे. मल्टी ट्रेड, पुणे ४ फोन ३३८९०४
- मे. न्यू हिंद टी.व्ही. सेंटर, पुणे ४ फोन ५३६८४
- मे. विविध लहरी, पुणे ३० फोन ४४६६९९
- मे. कैलास एजन्सीज, वाई. फोन २५२
- मे. वीर रेडिओज, भोर.
- मे. मेडिट्रॉनिक्स, पुणे २ फोन ४३२९७६
- मे. सदर्न टी.व्ही. सेंटर, मिरज. फोन २८६५
- मे. लक्ष्मी इलेक्ट्रॉनिक्स, सोलापूर. फोन २२२००
- मे. मराठे इलेक्ट्रॉनिक्स, इचलकरंजी फोन २०२८७

AKSHAY/USHA PUBLICITY 79/89

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रीशृंगेरी-मठ-शाखा-केन्द्र-सूची

उत्तर-भारत –

१ श्रीशंकर-विद्या-केन्द्र, (दूरवाणी - ६७०३८९) पश्चिमी-मार्ग, वसन्त-विहार, **नवी दिल्ली** ११००५७

२ श्रीशृंगेरी-शंकराचार्य-मठ, भीमगोडा-मार्गः, **हरिद्वार** २४९४०१

३ श्रीशृंगेरी-शंकराचार्य-मठ, दारागंज, **प्रयाग** (अलाहाबाद) २११००६

४ श्रीशृंगेरी-शंकराचार्य-मठ, बी-१४-१११ केदार-घाट, **वाराणसी** २२१००१ (दूरवाणी-६३६३४)

५ श्रीपञ्चगंगेश्वर-मठ, पञ्चगंगा-घाट, **वाराणसी** २२१००१

६ श्रीगोपाल-विहार-(पॅलेस)-प्रासादः बी-३८-२, बरद्वान-कोठी, महामूरगंज, **वाराणसी** २२१००१

७ श्रीशृंगेरी-शंकराचार्य-मठ, देवघाट, **गया** ८२३००१

८ श्रीशारदा-पीठ शंकर-हॉल, ९३ सदर्न-अवेन्यू, **कलकत्ता** ७०००२९ (दूरवाणी-४१-१७१७)

आन्ध्र-प्रदेश–

९ श्रीशृंगेरी-जगद्गुरु-शंकराचार्य-महासंस्थानम्, श्रीशारदा-पीठम्, गोदावरी घाट, **राजमहेन्द्री** ५३३१०१

१० श्रीशृंगेरी-शंकर-मठ (दूरवाणी-६१२८३ कनकदुर्गा-मन्दिर-समीपम्, **विजयवाडा** ५२०००१

११ श्रीशृंगेरी-शंकर-मठ, पिनपाडु, **तेनाली** ५२२२०१

१२ श्रीशृंगेरी-शंकर-विद्यालयम्, **कुञ्चवरम्**(गुण्टूर)

१३ श्रीशृंगेरी-शंकर-मठ, पार्वतीपुरम्, **गुण्टूर** ५२२००१

१४ श्रीशृंगेरी-जगद्गुरु-शंकर-मठ (तन्त्री-जगद्गुरु, दूरवाणी-६१९०८) युनिवर्सिटी-मार्गः, नल्लाकुण्टा, **हैद्राबाद** ५०००४४

१५ श्रीशृंगेरी-शंकर-मठ, आर् एन् माडा-स्ट्रीट, **तिरुपति** ५१७५०१

१६ श्रीशृंगेरी-शंकर-मठ, नरसिंह-तीर्थम्, **तिरुपति** ५१७५०१

१७ श्रीशृंगेरी-शंकर-मठ, नॉर्थ माडा-स्ट्रीट, **तिरुमलै** ५१७५०४

१८ श्रीशृंगेरी-जगद्गुरु-शंकर-मठ, वेस्ट-माडा-स्ट्रीट, **तिरुमलै** ५१७५०४

१९ श्रीशृंगेरी-शंकर-मठ, **उरवकोण्डा**(अनन्तपुरम्)

२० श्रीशृंगेरी-वेदशास्त्र-गुरुकुलम्, रामकृष्णराव-पेट, **राजमहेन्द्री** ५३३१०१

२१ श्रीशृंगेरी-शंकर-कृपा, ऑफिसर्स-क्वार्टर्स-एरिया, नॉर्थ माडा-स्ट्रीट, **तिरुमलै** ५१७५०४

२२ श्रीशृंगेरी-जगद्गुरु-महासंस्थानम्, शारदा-पीठम्, शंकर-मठ, **श्रीशैलम्** ५१८१०१

२३ श्रीशृंगेरी-शंकराचार्य-मठ, **वरंगल** ५०६००२

२४ श्रीशृंगेरी-शंकराचार्य-मठ, **नरसरावपेट** ५२२६०१

मद्र-(तमिळनाडु)-प्रदेश–

२५ श्रीशृंगेरी-शंकराचार्य-मठ, **कल्लिडैकुरिच्चि** ६२७४१६

२६ श्रीशृंगेरी-जगद्गुरु-शंकर-मठ, (दूरवाणी-४४२०४१) ९ वेंकटनारायण-मार्गः, टी-नगर, **मद्रास** ६०००१७

२७ श्रीशृंगेरी-शंकर-मठ, ७ कृष्णप्प-नायकन्-अग्रहार-मार्गः, जॉर्ज-टाऊन, **मद्रास** ६०००२८

२८ श्रीशृंगेरी-जगद्गुरु-प्रवचन-मन्दिरम्, श्रीशृंगेरी-मठ-मार्गः, आर्.के.पुरम्, **मद्रास** ६०००२८

२९ श्रीशृंगेरी-शंकराचार्य-मठ, सालै-स्ट्रीट, **काञ्चीपुरम्** ६३१५०१

३० श्रीशंकर-गुरु-कुलम् तथा'आचार्य-विद्यापीठम् ९७ अम्मा-मण्डप-मार्गः, **श्रीरङ्गम्**(तिरुची) ६२०००६

३१ श्रीशृंगेरी-शंकर-मठ, सन्निधि-स्ट्रीट, **दिण्डिगल** ६२४००१

३२ श्रीशृंगेरी-शंकर-मठ, **तिरुप्पूरु** ६३८६०१

३३ श्रीशृंगेरी-शंकर-मठ, तेंकरै, **शोलवन्दान** (मदुरै)

३४ श्रीशंकर-मठ, ८८ अम्मन-सन्निधि स्ट्रीट, **मदुरै** ६२५००१

३५ श्रीचन्द्रमौलीश्वर-मन्दिर, **तवत्तारेण्डल** (मदुरै)

३६ श्रीशृंगेरी-शंकर-मठ, **मानामदुरै** ६२३६०६

३७ श्रीशृंगेरी-शंकर-मठ, कोडम्बाक्कम्, **मद्रास** ६०००२४

३८ श्रीशृंगेरी-शंकर-मठ, **देवीपत्तनम्** ६२३५१४

३९ श्रीशृंगेरी-जगद्गुरु-महासंस्थानम्, शारदा-पीठम्, ईस्टकार-लस्ट्रीट, **रामेश्वरम्** ६२३५२६

४० श्रीशृंगेरी-शंकर-मठ, एस्.पी. सन्निधि-स्ट्रीट, **वीरवनल्लूर** ६२७४२६

४१ श्रीशृंगेरी-शंकर-मठ, अम्मन-सन्निधि-स्ट्रीट, **तिरुनेलवेल्ली** ६२७००६

४२ श्रीशंकर-नारायण-सेवाश्रमम्, श्रीशृंगेरी-शारदा-पीठम्, कृष्णापुरम्, **कडयनल्लूर** ६२७७५१

४३ श्रीशृंगेरी-शंकर-मठ, **श्रीविल्लीपुत्तूर** ६२६१२५

४४ श्रीशृंगेरी-शंकर-मठ, राजा स्ट्रीट, **कोयम्बत्तूर** ६४१००१

४५ श्रीशृंगेरी-शंकर-मठ, **पेरूर** ६४१०१०

४६ श्रीशृंगेरी-शंकर-मठ, अग्रहारम्, **सत्यमङ्गलम्** ६३८४०१

४७ श्रीशृंगेरी-जगद्गुरु-शंकराचार्य-महासंस्थानम्, शारदा-पीठम्, ९ वेस्ट मडवगलम्-मार्गः, **करूर** ६३९००१

४८ श्रीशृंगेरी-शंकर-मठ, न्यू स्ट्रीट, **इरोड** ६३८००१

४९ श्रीशृंगेरी-शंकर-मठ, ११ भवानीमार्गः, **भवानी** ६३८३०१

५० श्रीशृंगेरी-शंकराचार्य-मठ, **गोपीचेट्टीपलयम्**

५१ श्रीशृंगेरी-शंकर-मठ, सेकण्ड अग्रहारम्, **सेलम** ६२६००१

५२ श्रीशृंगेरी-शारदा-कल्याण-मण्डपः, शिवपुरम्, **तिरुनेलवेल्ली** ६२७००२

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५३ श्रीशृंगेरी-शंकराचार्य-मठ, कृपाशंकरी-मार्गः, वेस्ट माम्बलम्, **मद्रास** ६०००३३
५४ श्रीशृंगेरी-शंकर-मठ, न्यू कॉलनी, **तूत्तुकुडि** ६२८००३
५५ श्रीशृंगेरी-शंकर-मठ, सन्निधि मार्गः, **सुन्दरपाण्ड्यपुरम्** ६२७८५८
५६ श्रीशृंगेरी-शंकराचार्य-मठ, अग्रहारम्, **कोडुमुडी** ६३८१५१
५७ श्रीशृंगेरी-शंकर-मठ, रेस-कोर्स-मार्गः, **कोयम्बत्तूर** ६४१०१८

कर्णाटक-प्रदेश–

५८ श्रीशृंगेरी-शंकराचार्य-मठ, **कोटेकार** (मंगलूर) ५७४१६२
५९ श्रीशृंगेरी-जगद्गुरु-शंकर-मठ, **श्रीनिवासपुरम्** ५६३१५१
६० श्रीशंकर-मठ, शंकरपुरम्, **बङ्गलोर** ५६०००४ (तन्त्री- जगद्गुरु, दूरवाणी-६०२२७०)
६१ श्रीशंकर स्कूल ऑफ कल्तर, बुलटेम्पल-मार्गः, ११ बसवनगुडी, **बङ्गलोर** ५६०००४
६२ श्रीशृंगेरी-शंकर-मठ, १०१-६ वी मेन, मल्लेश्वरम्, **बङ्गलोर** ५६०००३
६३ श्रीशृंगेरी-शंकराचार्य-मठ, काशीविश्वेश्वर-मन्दिर-मार्गः, सुलतानपेट, **बङ्गलोर** ५६००५३
६४ श्रीशृंगेरी-शंकर-मठ, बी.एच्.रोड, **तुमकुर** ५७२१०१
६५ श्रीशृंगेरी-शंकर-मठ, के.आर्.पुरम् एक्स्टेन्शन, **हासन** ५७३२०१
६६ श्रीअभिनव-शंकरालयः, फोर्ट मोहल्ला, **मैसूर** ५७७२०४
६७ श्रीशृंगेरी-शंकर-मठ, **नञ्जनगूड** ५७१३०१
६८ श्रीशृंगेरी-शंकर-मठ-प्रॉपर्टीज्, **बेलवाडी**
६९ श्रीशारदा-मन्दिर-शंकर-मठ, शंकर-मठ-मार्ग, बसवनहल्ली, **चिक्कमगलूर** ५७७१०१
७० श्रीशृंगेरी-शंकराचार्य-मठ, शंकरमठमार्गः, **तरीकेरे** ५७७२२८
७१ श्रीशृंगेरी-शंकर-मठ, शंकरमार्गः, **शिवमोग्गा** ५७७२०१
७२ श्रीशृंगेरी-शंकराचार्य-मठ-प्रॉपर्टीज्, **कोल्लूर** ५७६२२०
७३ श्रीशृंगेरीशंकरमठ, भद्रकाली-मन्दिर-संमुखम्, **गोकर्ण** ५८१३२६
७४ श्रीशृंगेरी-शंकर-मठ, फातर्पेकर-मार्गः, **कारवार** ५८१३०१
७५ श्रीशृंगेरी-शंकर-मठ, कोटीतीर्थ-मार्गः, **गोकर्ण** ५८१३२६
७६ श्रीशृंगेरी-शंकर-मठ-प्रॉपर्टीज्, हुबळी-मार्गः, **धारवाड** ५८०००४
७७ श्रीरामेश्वर-देवस्थानम्, **हरकेरे** (शिवमोग्गा)
७८ श्रीशृंगेरी-शारदा-पीठम्, श्रीमहालक्ष्मी-मन्दिरम्, पेमत्रूरु(तोक्कट्टु) **बेलूर** ५७३११५

केरल-प्रदेश–

७९ श्रीशृंगेरी-शंकर-मठ, साऊथ स्ट्रीट, फोर्ट, **तिरुवनन्तपुरम्** ६९५००१
८० श्रीशृंगेरी-शंकराचार्य-मठ, **कालटी** ६८३५७४

महाराष्ट्र-प्रदेश–

८१ श्रीशृंगेरी-शंकराचार्य-मठ, जुने हनुमान-मन्दिर, चेम्बूर, **मुंबई** ४०००७१
८२ श्रीशृंगेरी-शंकराचार्य-मठ, काळाराम-मन्दिर-मार्गः, पञ्चवटी, **नासिक** ४२२००३
८३ श्रीहनुमान-मन्दिर, **पिम्पळगांव** (राहुरी-नगर)

सर्वसामान्यांच्या जिव्हाळयाची

रुपी को. ऑप. बँक लि. (शेड्युल्ड बँक)

मुख्यकचेरी : २०६२, सदाशिवपेठ, पुणे-३०.

आमच्या डोक्यात पैसाच पैसा !!!
होय, तुमच्या पैशांचा सांभाळ करुन
त्याला सुदृढ कसा करता येईल
त्याचा विचार आम्ही सतत करतो.
वेगवेगळया बचत योजनांद्वारे,
त्याला संस्कारीत करतो,
ज्यायोगे तो वाहवत तर जात नाहीच,
पण तुमच्या जीवन प्रवाहाला मदत करतो.
तुमच्या बरोबर वाहतो, वाढतो.

मुंबईसह पुणे शहर व जिल्ह्यात १६ शाखा.

श्री.श.का.पत्की जनरल मॅनेजर | **श्री.वि.कृ.गांगुर्डे** व्हाईस चेअरमन | **श्री.मा.ना.भंडारे** चेअरमन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पुण्यनगरीत शुभागमन (गुरुवार दि. १३ जुलै १९८९)



ॐ गं गणपतये नमः ।
श्रीमन्त दगडूशेठ हलवाई सार्वजनिक गणपतीची मंगलारती



शोभा यात्रा
शनिवारवाड्या जवळील छत्रपति शिवरायांची माता जिजाबाई यांच्या लालमहालासमोर.



स्वागत-पूजा-धूलिपाद-पूजा सेवा समितीचे कार्याध्यक्ष श्री. हरिभाऊ काळे, सौ. काळे यांच्या हस्ते. (दि. १३ जुलै ८९)

चातुर्मास्य समाप्ति दिवशी ललिता - त्रिशती - पूजा प.पू. 'श्री' चे महाराष्ट्र प्रतिनिधी, संपर्काधिकारी पं. वसन्तराव गाडगीळ व सौ. सुधाताई यांच्या हस्ते.

Sri Vidyabharathi Book Centre, Sringeri

महाराष्ट्र - राज्यपालांचे जगद्‌गुरु पूजन -

CC-O. In Public Domain. Digitized by eGangotri

॥ वन्दे गुरु परंपराम् ॥
ना. ब्रह्मानंद रेड्डी सपत्नीक श्री जगद्‌गुरूंचे पूजन करतांना

सेवा समितीचे एक चिटणीस श्री. माधवराव गुर्जर राज्यपाल पति-पत्नींना श्रीव्यास-नारद प्रसाद देतांना.

श्री सद्‌गुरु चरणातें वाट पुसतु -



सेवा समितीचे अध्यक्ष पू. ब्रह्मश्री दत्त महाराज कवीश्वर यांच्यासह कार्याध्यक्ष श्री. हरिभाऊ काळे आणि प. पू. 'श्रीं' चे प्रतिनिधी पं. गाडगीळ.



केसरी वाडा गणेशोत्सवात ज्ञानसत्राचे उद्‌घाटन

॥ आनन्दं परमानन्दम् ॥



पुणे विद्यार्थी गृहातील धनुर्धारी श्रीराम मंदिरात

Sri Vidyabharathi Book Centre, Sringeri



------ आणि संगणक विभागातील हे मुक्त हास्य!

CC-O. In Public Domain. Digitized by eGangotri

चातुर्मास्य प्रारंभ




श्री व्यास पौर्णिमा - श्री हरिकीर्तनोत्तेजक सभेच्या महर्षि श्री वेदव्यास मन्दिरांत श्री व्यास पूजेने प. पू. 'श्रीं' चा चातुर्मास्य - अनुष्ठान संकल्प दि. १८ जुलै १९८९.

चार्तुमास्य व्रत समापन




खडकवासला येथील नौदलाच्या संरक्षित जलाशयांत प्रौष्ठपदी (भाद्रपद) पौर्णिमेच्या प्रातःकाळी प.पू. 'श्रीं' चे दीक्षा विसर्जन स्नान. स्नानोत्तर नौकारोहण, आणि श्री चंद्रमौलीश्वर पूजन.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्री गणपति वाक्यार्थ महासभा

केन्द्रीय सूचना प्रसारण मंत्री श्रीकृष्णकुमार आद्य शंकराचार्य जन्मक्षेत्री केरळांत कालटी येथे 'आद्य शंकराचार्य संस्कृत विश्व विद्यालय' स्थापन करण्याचा निश्चय उद्घोषित करीत आहेत.





प.पू. 'श्री' चा प्रसाद (पुरस्कार - महावस्त्र) स्वीकारतांना पुण्याचे पं. वामनशास्त्री भागवत व डॉ. शि. द. जोशी. वाराणसीचे नैयायिक पं. जयरामशास्त्री शुक्ल आणि अग्रसम्मानाचे मानकरी पंडितराज पेरि सूर्यनारायणशास्त्री.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

।। श्रीगुरुभ्यो नमः ।।

सिद्धार्थि-संवत्सर-वैशाख-शुद्ध-पञ्चम्यां शंकर-जयन्त्युत्सवावसरे शृङ्गगिरि-क्षेत्रे प्रवृत्ते भगवत्पाद-प्रतिष्ठापित-पुरी-शृङ्गेरि-द्वारका-बदरिकाख्य-चतुराम्नाय-पीठाधीश्वर-सम्मेलने शृङ्गेरि-जगद्गुरु-श्रीमदभिनव-विद्यातीर्थमहास्वामि-करकमल-संजात-श्रीभारतीतीर्थमहास्वामिनाम् –

।। अनुग्रह-भाषणम् ।।



तत्त्वमुद्रा-लसत्-पाणिः ज्ञान-चन्द्र-कलाधरः ।
भगवान् दक्षिणामूर्तिः नः प्रेरयतु शेमुषीम् ।।

अच्छ-स्फटिक-सच्छाय-तनुराद्दृत-कच्छपी ।
वाचाम् अधीश्वरी देवी वाचमच्छां प्रयच्छतु ।।

श्रीमच्छंकरभगवत्पादानां जयन्त्युत्सवावसरेऽद्य पूततमेऽस्मिन् शृङ्गगिरि-क्षेत्रे चत्वारोऽपि भगवत्पाद-प्रतिष्ठापिताम्नाय-पीठाधीश्वराः उपदेशान् प्रदित्सवः अत्र सममिलन्निति जानन्त्येव भवन्तः । अस्मदाचार्य-चरणानाम् आज्ञां पुरस्कृत्य द्वित्राणि वचांसि केवलं श्रीचरणानां सन्निधौ विजिज्ञापयिषुः प्रारभिषि ।

मानाधीना मेय-सिद्धिरिति शास्त्रीयः पन्थाः । अस्य चायमर्थः – यत्र माणमन्तरा न कस्यापि वस्तुनः सिद्धिर्भवतीति । तथा च कस्यापि वस्तुनः सिद्धौ प्रमाणे कस्मिंश्चिदपेक्षिते केन प्रमाणेन कस्य वा सिद्धिर्भवतीति जिज्ञासायां सामान्यतः परिदृश्यमानानि वस्तूनि प्रत्यक्षेणैव सिध्यन्तीति चार्वाक-प्रभृति-सर्वो ऽपि लोकः अभ्युपगच्छत्येव । परन्तु यदि केऽपि प्रत्यक्षम् एकमेव प्रमाणं मन्यमानाः प्रत्यक्षातिरिक्तं वस्तु नास्तीत्युद्घोषयेयुः तानेव अनुशोचामो वयम् । यतो हि न केवलं प्रत्यक्षेणैव सर्वोऽपि नः व्यवहारः सम्पद्यत इति केनापि प्रतिज्ञातुं शक्यम् । इदमेकमेव तेषां पराजय उदाहरणं भवितुमर्हति यत्सर्वोपि लोकः स्वस्य पितुर्नाम कथयति पितामहस्य नाम कथयति प्रपितामहस्य च । स किं तन्नामशालिनं स्वस्य पितामहं साक्षाच्चकार ? अथवा स्वेन उच्यमानं यन्नाम तन्नामशालिनं स्वप्रपितामहं वा साक्षाच्चकार ? तेषु विषयेषु प्रत्यक्षस्य अभावेऽपि शब्दस्यैव प्रमाणमुररीकुर्वन् यथा वा एतन्नामा पितामह-प्रपितामह इति कथयति अत एव तेन पुरुषेण अनायत्त्या शब्दस्य प्रामाण्यम् अभ्युपगन्तव्यम् आपतत्येव । तथा चैवं लौकिकस्य शब्दस्य प्रामाण्ये सिद्धे किमु वक्तव्यं भगवतः सर्वज्ञस्य मुखादनायासेन निस्सृतस्य वेदस्य प्रामाण्य-विषये । एवं खलु वेदस्य प्रामाण्यं सर्वैरप्यास्तिकैः प्रतिज्ञायते यत् केचन वेदम् अपौरुषेयं वदेयुः । केचन सर्वज्ञ-कल्पस्य भगवतः ईश्वरस्य मुखाद्विनिःसृतं वदेयुः । अपौरुषेयत्वे वा ईश्वरमुखाद्विनिःसृतत्वे वा प्रामाण्यस्य सर्वात्मना स्वीकर्तव्यत्वे न कोऽप्यास्तिक-दार्शनिको विप्रतिपद्यते । एवं वेदस्य प्रामाण्यं यदा सिद्धं तदा वेदः किं बोधयतीत्यस्माभिः ज्ञातव्यमास्ते ।

प्रमाणं यद् बोधयति तदेव खल्वस्माकम् उपादेयं भवति । वेदश्च किं बोधयति ? एवं खलु वेद-वाक्यान्यस्माभिरनुश्रूयन्ते " यज्ज्योतिष्टोमेन स्वर्गकामो यजेत " " दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत " इत्यादीनि । नहि ज्योतिष्टोमस्य स्वर्गस्य च कार्यकारणभावः प्रत्यक्षादिना अन्तरा श्रुति-प्रमाणं केनापि युक्ति-कुशलेन ज्ञातुं शक्यम् । न ह्यप्रत्यक्षे तस्मिन् प्रत्यक्षं प्रमाणं क्रमते तदुपजीविनाम् अनुमानादीनां तु का वार्ता ? अतः अनायत्त्या शब्दस्यैव प्रामाण्यम् अभ्युपगन्तव्यं ज्योतिष्टोम-स्वर्गयोः कार्य-कारण-भाव-परम् । स कार्यकारण-भावः अस्माभिः कथं वा अभ्युपेतव्यः इति पुनः प्रत्यक्ष-मात्र-प्रमाण-वादी कश्चन आशङ्केत । तस्याप्युत्तरं नैयायिकैरुक्तं कुत्रचित् । न्यायमञ्जरीकारो जयन्तभट्टो लिखति तथा ह्यस्मत्पितामह एव ग्रामकामः सांग्रहणीं कृतवान् । स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप इति । वैश्वदेवीं सांग्रहणीं निर्वपेद् ग्रामकामः इतीयं श्रुतिः सत्यां ग्रामकामनायां विश्वेदेव-देवताख्या सांग्रहणीष्ट्या यागाः कर्तव्य इति बोधयति । न्यायमञ्जरीकारः स्वस्य प्रत्यक्ष-प्रमाणेनापि श्रुत्या उक्तस्य कार्यकारणभावस्य सिद्धिं सूचयति । तथा च श्रुतिः प्रमाण-मूर्धन्या यद् बोधयति तत्सर्वैरपि लोकैः अङ्गीकर्तव्यमिति तु सिद्धं भवति । तथा च श्रुतिः ज्योतिष्टोमादीनि कर्तव्यान्युपदिश्य अन्ते तु वदति न केवलं कर्मभिः भवता यदीप्सितम् आत्यन्तिकं सुखं न तल्लब्धुं शक्यम् । 'नास्त्यकृतः कृतेन' इति पुनः श्रुतिः स्पष्टमुपदिदेश । अकृतः अकृतकः अजन्य इत्यर्थः मोक्षः कृतेन कर्मणा नास्ति नोत्पद्यते इति तस्याः श्रुतेरभिप्रायं व्याख्यातारो व्याचचक्षिरे । तथा यस्य कस्यापि साधनस्य अजन्यो यो मोक्षः सः कर्मभ्यः कथं वा उत्पत्तुं शक्यते इति तु विवेकिभिः विचारयितुं शक्यं विचार्य च अजन्यस्य मोक्षस्य कर्मजन्यत्वं न सम्भवतीति निश्चेतुमपि शक्यम् । तथा च मोक्षस्य अजन्यस्य कर्माजन्यत्वे सिद्धे तर्हि मोक्षः कथमस्माभिरवाप्तव्य इति विचिकित्सायां भगवत्पादा ऊचुः –" त्वं नित्यमुक्तोऽसि । कथं वा मोक्षस्य आप्यता ?"

नहि मोक्षः संस्कार्यः विकार्यः उत्पाद्यः प्राप्यो वा । नहि स उत्पाद्यः । 'नास्त्यकृतः कृतेन' इति श्रुत्यैव निषिद्धत्वात् उत्पाद्यत्वस्य । नहि सः संस्कार्यः । कस्याप्यतिशयस्य तत्र अनाधातव्यत्वात् । अनाधेयम् अतिशयं हि मोक्षं संगिरन्ते प्रमाणतत्त्वविदः । तथा च तस्य असंस्कार्यत्वम् । नापि स विकार्यः । कस्यापि विकारस्य तत्र उत्पत्तुमशक्यत्वात् । अनुत्पाद्यत्वादेव तस्य । उत्पद्यमाने हि वस्तुनि विकाराः सम्भवन्ति । कथं वा अनुत्पद्यमाने ? आप्यत्वं तु प्रागेव निराकारि नित्यत्वात् । तथा च उत्पाद्यत्व-विकारत्व-संस्कार्यत्व- आप्यायत्व-रूपाणां चतुर्विधानामपि मोक्षे असम्भवात् नित्य-मुक्त-स्वरूपाणाम् अस्माकं कस्य अपेक्षा कर्मादेः अस्ति । तर्हि भवान् नित्यं मुक्तोऽस्ति तर्हि किमर्थं दुःखमनुभवति । नहि नित्यमुक्तस्य दुःखानुभवो विद्यते । नहि सवितृ-प्रकाशे चरन् कश्चन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मनुष्यः अन्धकारमनुभवति । नापि अन्धकारोऽस्ति मया पदार्थाः न ज्ञाप्यन्त इति च वदेत । एवं यदि वयं नित्यमुक्ताः स्मः तर्हि कथं वा दुःखमनुभवामः इत्याशङ्कायां सत्यं भवान् नित्यं मुक्त एव परन्तु स्वस्य स्वरूपम् अजानानो दुःखमनुभवति । नह्यविद्यामन्तरा कश्चन हेतुः संसारस्य केनापि तार्किकेण वा अन्येन वा अनुमातुं शक्यः । तथा च स्व-स्वरूपस्य अज्ञानादेव अयं संसारः तद्-हेतुकश्च बन्धः । तद्-हेतुकं च दुःखम् अस्माभिरनुभूयते । तथा चास्य दुःखस्य निवृत्तिः स्व-स्वरूप-ज्ञानमात्राद् भवति नान्यस्मात्कारणात् । तथा चेमं दृष्टान्तं वदन्त्यभिज्ञाः । यथा सायं समये मनागन्धकारायिते प्रदेशे पतितां कांचन रज्जुं दृष्ट्वा सर्प इति भीतः सन् सर्प-भय-जनितान् विकारान् अनुभवति । तस्य खलु सा भीतिः कथं वा विचारयितुं शक्या । यदि वास्तविकी सर्प-जनिता भीतिः स्यात् तर्हि सर्पाणाम् अधिराजं वासुकिं गरुडं वा स्मृत्वा नमस्कृत्य सा भीतिः अपनेतव्या स्यात् । अथवा मान्त्रिकान् आहूय तद्द्वारा वा सा भीतिः अपनेतुं शक्या । अथवा मूलिकादिभिर्वा अपनेतुं शक्या । न ह्ययं पृदाकुस्तादृशः यस्माज्जनिता भीतिः नमस्कार-मन्त्रौषधाद्यैः अपनेतव्या स्यात् । अपि तु केवलं रज्जु-तत्त्वस्य परिज्ञानमात्रादेव निवर्तते। नान्यस्माद् हेतोः । इदं तु सर्वेषां नः अनुभवपथे अस्ति । इदमेव संसारविषयेऽप्यतिदिश्यतामित्युक्तं भगवत्पादैः ।

यथा भ्रान्त्या कश्चन पदार्थम् अन्यथा ज्ञातवान् कश्चन पुरुषः तादृश अन्यथा-ग्रहण-जनित-विकारापनोदनाय तस्य वस्तुनः यथार्थ-ज्ञानमेव हेतुम् अनुभवति नान्यं कञ्चन एवं नित्य-शुद्ध-बुद्ध-मुक्त-सत्त्व-स्वरूपस्य आत्मनः याथातथ्यापरिज्ञान-निमित्तोऽयं संसारः आत्मनः याथार्थ्य-परिज्ञानेनैव निवर्तते नान्येनेति श्रुतीनाम् उद्घोषः । स एव च भगवत्पादैः प्रस्थान-त्रय-भाष्येषु पदे पदे उदटङ्कि । अयमेव च विषयो निरधारि । तथा च आत्मनः स्व-स्व-स्वरूपावगतिरेव मोक्षस्य हेतुः नान्य इति सिद्धम् । तथा च भगवत्पादैः यदिदं श्रुतिषु निगूढं तत्त्वम् उपदिष्टं तदस्माभिः सम्यगाकलनीयम् । अत एव भगवत्पादैः क्वचिदुक्तम्–

“ नहीदमति-गम्भीरं भाव-याथात्म्यं तर्कावगाह्यम् अपि तु श्रुत्यैकावगाह्यम् ” इति ।

श्रुतिरेकैव एतादृशम् अतिगम्भीरं तत्त्वं ज्ञापयति नत्वन्यत् किमपि प्रमाणम् । अतः एतादृशम् अतिगम्भीरं भाव-याथात्म्यं न सुलभतया अस्माकम् अनुभवपथम् आरोहेत । तत्र हीदं कारणं यदस्माकं याः अनाद्यविद्या-जनिता वासनाः ताः न सुलभेन उपायेन अपगच्छन्ति । तासां त्वपगमे महान् क्लेश एव अस्माभिः अनुभवितव्यः । अत एव स्मरन्ति कुत्रचित् –

“ ब्राह्मणस्य तु देहोऽयं नोपभोगाय कल्पते ।
इह क्लेशाय महते प्रेत्यानन्तसुखाय च ।। ”

इह महते क्लेशायैव अयं ब्राह्मणस्य देहः कल्पते । तर्हि क्लेशमात्रपर्यवसायित्वम् इति चेत् न । प्रेत्यानन्तसुखावाप्तिरपि च भविष्यति । अतः अनन्तं सुखं यः कामयते सः अल्पं दुःखम् अवश्यम् अनुभवेदेव । यथा वा मीमांसकैः निरुच्यमानं यत् स्वःपदवाच्यं सुखं यत्र दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् अभिलाषोपनीतं चेत्यादि लक्षण-लक्षितं तस्य सुखस्य प्राप्तये यज्ञादिकं विधेयमेव । तत्र च धूमादिः आगत्य मनागिव दुःखं जनयेदेव । परन्तु धूमादि-जन्यात् दुःखाद् बिभ्यत् कश्चन पुरुषः यज्ञादिभ्यो यदि निवर्तेत तर्हि तादृशं यत्र दुःखेन संभिन्नम् इत्यादि लक्षण-लक्षितं सुखं प्राप्तुं नैव शक्नुयात् । अतः तादृशम् उत्कृष्टं सुखं प्राप्तुम् अल्पीयो दुःखम् अनुभवितव्यमेव । इत्थमेव नित्य-निरतिशयानन्द-रूपस्य मोक्षस्य प्राप्तये इह क्लेशाः सोढव्या एव । अतः कथं वा तस्य प्राप्तिः इति जिज्ञासायां भगवत्पादैरुक्तं प्रथमतश्चित्तं शुद्धीक्रियताम् इति । चित्ते खलु काम-क्रोधादि-मालिन्य-दूषिते आत्मतत्त्वं न प्रविशेत् ततः तादृश-मालिन्यानाम् अपनोदनं प्रथमतः कर्तव्यं तच्च कर्मभिरेव सिध्यति । कर्माण्येव चित्तं शोधयितुं पारयन्ति नान्यत् किंचित् । अत एव कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इति स्मरन्ति । कषाये कर्मभिः पक्वे कषाये – चित्त-मालिन्ये राग-द्वेषादौ कर्मभिः पक्वे नाशिते सति ततो ज्ञानं प्रवर्तते इति तस्यार्थः । अतः प्रथमतः चित्तस्य शुद्धये कर्माण्यवश्यम् अनुष्ठातव्यान्येव । अत एव भगवताप्युक्तम्– **‘ न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ’** इति । कर्मणामनारम्भान्नैष्कर्म्यं पुरुषः नैव अश्नुते । अतः कर्माण्यारभ्याण्येव । परन्तु कर्माणि कृत्वा चित्तस्य शुद्धिं सम्पाद्य अनन्तरं कर्मभ्यः उपरतः सन् संन्यस्य च सर्वाणि कर्माणि सद्गुरुम् उपसृत्य ततः त्रय्यन्त-वाक्यानि श्रुत्वा तान्येव मत्वा च ज्ञानं प्राप्नुयात् । इत्ययम् औपनिषदः क्रमः भगवत्पादैः उपदिष्टः । यद्यप्ययं क्रमः उपनिषत्सु निगूढः न भगवत्पादोऽपज्ञः अयं क्रमः तथापि कस्मिंश्चित् काले एतादृश-पथः विपरिलोपः समजनि । अतः लोकाः औपनिषदं तत्त्वं ज्ञातुम् अप्रभूष्णवः सन्तः यत्किंचित् त्रय्यन्त-व्याख्यानं दृष्ट्वा तदुक्तेनैव वर्त्मना ज्ञानं प्राप्तुं प्रायतन्त । मोक्षम् अधिगन्तुं प्रायतिषत । परन्तु न तानि वर्त्मानि मोक्षम् अधिगन्तुं कथञ्चिदपि उपाकुर्वन् । अतो हेतोः लोकान् मोक्षमार्गम् उपनिषत्सु निगूढं पुनः बोधयितुमेव भगवान् शंकरः भगवत्पादरूपेण अवततार इतीदं सर्वैरस्माभिर्ज्ञातव्यम् । भगवत्पादाः इदं तत्त्वं सर्वान् लोकान् अवबोध्य प्रस्थानत्रय-भाष्याणि विरचय्य तस्य तत्त्वस्य सार्वकालिक- प्रचाराय चतुरो मठान् चतसृषु दिक्षु प्रत्यतिष्ठिपन् । तदा प्रभृति तेषु मठेषु या परम्परा समागच्छति सा यथाशक्ति भगवत्पादादिष्टं कार्यं निर्वहन्त्येव दरीदृश्यते । तत्तादृश्यां परम्परायां प्रविष्टाः अधुनातना जगद्गुरवः अत्र शृङ्गगिरिक्षेत्रे अद्य संमिल्य भवतः सर्वानप्यानन्दयन् । सर्वेषां भवतां प्रमोदस्य स्थानमिदं यदद्य एतादृशानां महानुभावानां दर्शनम् । अहं त्विदमभिप्रैमि यत् एतादृशैः संमेलनैः पुनः पुनः भगवत्पादोपदिष्टं तत्त्वं लोकेषु प्रसार्यताम् । तच्च तत्त्वमधिगत्य लोकाः श्रेयः प्राप्नुयुः । भगवत्पादोपदिष्टः पन्थाः सर्वेषु कालेषु प्रसृतो भवतु । सर्वेऽपि वयं भगवत्पादान् संस्मृत्य संस्मृत्य श्रेयः प्राप्नुयाम । अस्माकं श्रेयोऽवाप्तौ भगवत्पादानां स्मरणं तत्प्रदर्शित-पथा चरणम् इदमेकमेव शरणं नान्यदिति पुनः पुनरुद्धृत्य इतः परम् अस्मद्-गुरुचरणैः अनुगृह्यमाणं संदेशं शुश्रूषुः अधुना अमुष्माद् भाषणाद् विरमामि ।

सिद्धार्थि-वैशाख-शुद्ध-पञ्चमी भौमवासरः १-५-१९७९.

।। अभिवादनम् ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

।। श्रीशिवः शरणम् ।।

श्रीमत्-परमहंस-परिव्राजकार्येत्याद्यनेक-बिरुदाङ्कितेषु
दक्षिणाम्नाय-शृङ्गेरी-शारदा-पीठाधीश्वर-श्रीमत्-जगद्गुरु-शंकराचार्य-

श्रीभारतीतीर्थ-संनिधान-श्रीचरणेषु

- सभक्त्युन्मेषं सविनयादरं च समर्पितम् -

अभिवादन-पत्रम्

श्रीमत्सु यथार्थ-वैदिक-धर्म-मार्गदर्शन-धुरंधरेषु, आचार-व्यवहार-प्रायश्चित्ताख्य-भगवदवतार-कार्य-प्रवणेषु, संतत-तपोनुष्ठानोद्दीपित-योगज-धर्म-साक्षात्कार-विभूषितेषु सर्व-तन्त्र-स्वतन्त्र-प्रज्ञा-शक्ति-शालिषु सर्व-भूत-हिते रतेषु श्रीमज्जगद्गुरु-श्रीशंकराचार्य-श्रीभारतीतीर्थमहास्वामि-चरणारविन्द-पटि-सटेषु साष्टाङ्ग प्रणमन्तो वयम् आवेदयामः सर्वे ऽपि पुण्यपत्तन-निवासिनश्छात्राः ।

संयमीन्द्राः ! ऐषमश्चातुर्मास्य-व्रतानुष्ठान-निमित्तम् अत्र पुण्यपत्तने श्रीचरणानाम् अस्मदीय-पुण्योत्कर्ष-संपादक-निवासेन, समस्त-दुरित-निरास-पूर्वकं पाविता वयं; सर्व-मङ्गला-जानेः परमात्मनः परमानुकम्पया, श्रीचरणानां महान्तम् उपकार-भरं स्मारं स्मारं यत् सत्यं समाधानस्य परां काष्ठाम् अधिरोपिताः स्मः ।

वेदान्त-विज्ञान-सुनिश्चितार्थैः शुद्ध-सत्त्वैः नित्य-सरस्वत्याः प्रभविष्णुभिः श्रीभगवत्-पादैर्, अव्यक्त-रूपाङ्गीकारेऽपि श्रीचरणानां व्यक्त-स्वरूपेण धर्म-संस्थापन-कार्यम् अद्यापि सनिर्भरं चिरं निर्वर्त्यत एवेत्युक्तिर्, नात्युक्ति-कोटिम् आटीकेत ।

अस्मदीय-सुकृत-न्यूनतया श्रीचरणानाम् इतो गमन-काले संप्राप्तेऽपि, स कालः श्रीचरणानां कृपा-कूर्म-दृष्ट्या पुनरागमन-काल-पर्यवसायितां भजताम्, समेधतां च श्रीचरण-पवित्र-सान्निध्य-लाभात् पूते ऽस्मच्चेतसि –

'आचार्याः शंकराचार्याः सन्तु जन्मनि जन्मनि ।'

–इत्येवं स्थिरतरा श्रीभगवत्-पाद-भक्तिः इत्येव श्रीचरण-सन्निधाने
संततम् अभ्यर्थयामहे । इति

प. पू. जगद्गुरु-श्रीशृंगेरी-शंकराचार्य-चातुर्मास्य-सेवा-समिति, पुणें.

२२ सप्टेम्बर १९८९

भाद्रपद कृ ८, शके १९१०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

।। श्रीः ।।

श्रीमत्-परमहंस-परिव्राजकाचार्यवर्य-पद-वाक्य-प्रमाण-पारावार-पारीण-यम- नियमासन-प्राणायाम-प्रत्याहार- धारणा-ध्यान-समाध्यष्टाङ्ग-योगानुष्ठान-निष्ठ-तपश्चक्रवर्त्यनाद्यविच्छिन्न-श्रीशंकराचार्य-गुरु-परम्परा-प्राप्त-षड्दर्शन-स्थापना चार्य-व्याख्यान-सिंहासनाधीश्वर-सकल-निगमागम-सार - हृदय - सांख्य-त्रय - प्रतिपादक - वैदिक - मार्ग-प्रवर्तक-सर्व - तन्त्र-स्वतन्त्रादिराजधानी- विद्यानगर - महाराजधानी- कर्णाटक - सिंहासन - प्रतिष्ठापनाचार्य - श्रीमद्-राजाधिराज-गुरुभूमण्डलाचार्य-ऋष्यशृङ्गपुरवराधीश्वर-तुङ्गभद्रा-तीर-वासि-श्रीमद्-विद्याशंकरपादपद्माराधक

श्रीजगद्गुरु-श्रीमदभिनवविद्यातीर्थस्वामि-गुरु-कर-कमलसञ्जात-

जगद्गुरु-शृङ्गेरी-श्रीभारतीतीर्थ-महास्वामिनां

मङ्गलतम-पट्टाभिषेक-शुभावसरे अखिल-भारतस्थ-शृङ्गेरी-जगद्गुरु-संस्थानीय-शिष्यजनैः श्रीचरणानां चरणारविन्दयोः सभक्ति-श्रद्धं साष्टाङ्ग-प्रणति-तति-पुरस्सरं समर्पिता

विज्ञप्तिः

श्रीमच्छंकर-भगवत्पादैः सनातन-धर्म-प्रचाराय भारतस्य चतःसृषु दिशासु प्रतिष्ठापितेषु अभ्यर्हिततमे दक्षिणाम्नाय-शृङ्गेरी-शारदापीठे षट्-त्रिंशत्तम-पीठाधि- पतित्वेन अभिषिच्यमानानां श्रीचरणानां दर्शनेन वयं सर्वेऽपि आत्मानं धन्यं मन्यामहे । तपोधनस्य महर्षेः ऋष्यशृङ्गस्य तपोभूमावस्यां तत्राम्नैव प्रथिते शृङ्गगिरि-क्षेत्रे भगवत्पादैः प्रतिष्ठापितमिदं शारदापीठं नैकैः महापुरुषैः अधिष्ठितं सत् जगतीतले अनितर-साधारणीं कीर्तिमावहति । अस्मिन् हि पीठे सुरेश्वराचार्य-प्रभृतयः पुंभाव-सरस्वत्यः, विद्यारण्य-प्रभृतयः राजाधिराज-वन्द्य-पादारविन्दाः, श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारती-प्रभृतयः अप्रतिम-प्रज्ञा-सम्पन्नाः, श्रीचन्द्रशेखरभारती-प्रभृतयः ब्रह्मज्ञानि-तल्लजाः व्यराजन्त । ब्रह्मलीनाः श्रीअभिनवविद्यातीर्थगुरुचरणाः सर्वातिशायि-प्रतिभासम्पन्नाः व्यराजन्त । तत्तादृशां महापुरुषाणां परम्परायां श्रीचरणाः अधुना पट्टाभिषिक्तास्सन्तो विराजन्त इति सर्वेषां नः चेतांसि आनन्दस्य परां काष्ठामनुभवन्ति ।

भगवत्पादानाम् अनुशासनमनुसृत्य विशेषतः दक्षिण-भारते धर्म-प्रचारः शृङ्गगिरि-शारदापीठाधीशायत्तः । तमिमं धर्मप्रचारं भवद्गुरुचरणाः अनेक-वत्सर-सञ्चार-पूर्वकं व्यधासिषुः । तैर् अनुगृहीतानां भाग्य-शालिनाम् असंख्याकानां शिष्याणां श्रद्धादर-पात्राणि भवन्त इति सानन्दं निवेदयामः ।

भवन्तः आबाल्यात् दैव्या सम्पदा परिभूषिता आचार्य-चरणानाम् अपार-कृपा-पात्रताम् अवाप्नुवन् । भवतां शास्त्रेषु अप्रतिमं पाण्डित्यं, व्यवहार-कौशलं, शिष्यजनेष्वनुकम्पा इत्यादयो गुणाः भवत्सु गुरुचरणानाम् अनुकम्पातिशयम् अस्माकं च भक्त्यतिशयम् अजनयन् जनयन्ति च ।

नैकेषां शङ्कर-मठानां निर्मापणं, तत्र देवतामूर्तीनां प्रतिष्ठापनं, धर्म-प्रचारकाणां प्रोत्साहनं, शास्त्र-सभा-प्रवर्तनं, वेद-शास्त्र-विदुषां सम्माननं, संस्कृत-प्रचाराय सततं परिश्रमः इत्यादीनि भवदाचार्यचरणैः समारब्धानि कार्याणि भवद्भिः इतोऽप्याधिक्येन विधास्यन्त इति वयं दृढं विश्वसिमः ।

अस्मिन् सुसन्दर्भे श्रीचरणान् वयमिदमेव प्रार्थयामहे यद् भवन्तः भवदाचार्यचरणा इव असकृद् धर्मयात्रां विधाय शिष्यजनान् अस्मान् अनुगृह्णन्तु । भवतां प्रवचनैः भवताम् उपदेशैश्च लोकानां चेतस्सु धर्मश्रद्धा भगवद्भक्तिः गुरुजनेष्वादरः इत्यादयः वर्धिष्यन्त इत्यत्र न कस्यापि संशयः । भवन्तः अस्मिन् पीठे विराजमानाः शिष्यान् अस्मान् अनुगृह्णन्तः शरदां शतमेधन्तामिति श्रीचन्द्रमौलीश्वरौ श्रीमदाचार्यपादांश्च प्रार्थयामहे ।

शृङ्गगिरिः
शुक्ल - संवत्सर आश्विन - कृष्ण - पञ्चमी
गुरुवासरः

सर्वदा सर्वथा श्रीचरणानाम् आज्ञावंशवदाः
शिष्यजनाः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आद्य श्रीशंकराचार्य आणि परमपवित्र शृंगेरीपीठ

भारताच्या धार्मिक, सांस्कृतिक व तत्त्वज्ञानाच्या इतिहासांत आद्य श्रीशंकराचार्य क्रिस्ताब्द ७८८-८२०) या लोकोत्तर कर्तृत्वाच्या, अलौकिक बुद्धिमत्तेच्या आणि प्रतिभा-शारदेचा वरदहस्त लाभलेल्या महापुरुषानें केलेले अमर कार्य म्हणजेच सनातन, आर्य वैदिक संस्कृतीचें पुनरुज्जीवन आणि स्थिर प्रतिष्ठा. आजच्या जगांत वाक्सम्राज्ञी, मधुरवाणी संस्कृत-भाषा, तिच्या माध्यमातून सर्वांना पवित्रित करणारी– चतुर्वेद, उपनिषदें, गीताभाष्य यांचा अथांग महासागर असणारी – श्रुतिविद्या, कन्याकुमारी-रामेश्वरापासून काशी-पशुपति-नेपाळ-बद्रीकेदारापर्यंत उभ्या आणि द्वारका-सोमनाथ ते जगन्नाथपुरी-गंगासागरापर्यंत आडव्या धाग्यांनी विणलेला तीर्थरूप भारताचा प्रतीक-रूप भगवा ध्वज तसेच अग्निनारायणाच्या उपासनेमुळें दशदिशा पवित्रित करणारी यज्ञसंस्था या सर्व पवित्र, प्रसन्न, मंगल भारतीयतेच्या प्रतीकांची गंगोत्री म्हणून राष्ट्रिय एकात्मतेचा मूलाधार म्हणून अद्वैत तत्त्वज्ञानाचे प्रवर्तक म्हणून भारताच्या भारतीयत्वाचे, हिंदूंच्या हिंदुत्वाचे प्रतीक म्हणून कुणापुढे नतमस्तक व्हायचे असेल तर ती युगप्रवर्तक, राष्ट्रैक्य संवर्धक लोकोत्तर विभूति आहे जगद्गुरु आद्य श्रीशंकराचार्य.

